वधूर्यादिकवनेशलतथापिपश्यामिडूलेवंदेव। नविपनीतां त्रिरात्रमक्षारालवणा। शिनोस्यातामधःशय्याती। विवाहदि
नमानम्यत्रिरात्रंवी। णिअहारात्रा। णिअक्षारालवणाशिनौ। अक्षारानंव अलवणंचअक्षाराः लवणंतत्र अश्नीतइत्यर्थः शीलौ। अक्षाराः
नै लवणाशिनोस्यातां भवतौ। अधः भूमानखट्वायां शयीयातौ। संवत्सरं त्रामिथुनमुपयातां द्वादशरात्रंषड्रात्रं त्रिरात्रमन्ततः। संव
त्सरंवर्जयावत्रमिथुनमनिगमनंनापय्यातांनापगच्छेतां अथवा द्वादशरात्रं अथवा षड्रात्रं। यद्वा त्रिरात्रं अंततः संवत्सरा। दिपक्षा

णम्मन्तत्रिरात्रमित्यर्थः। संवत्सरादिविकल्पास्तु शक्त्यपेक्षया व्यवस्थिता विज्ञेयाः। संवत्सरादिपक्षाशक्तौ त्रिरात्रपक्षः। अयमेव चतुर्थीक
र्मानन्तरं पंचम्यादिरात्राववनिगमनेवं चतुर्थीकर्मणः प्राक् तस्यानार्य्यामेवं नसंहृतं विवाहैकदेशत्वाच्चतुर्थीकर्म्मणः॥ ४॥ इति सूत्रा
र्थः॥ अथ पद्धतिः। अथ प्रकृतं विवाहकर्म्माह। तत्र प्रथमपद्धति मातृपूजापूर्वकं कन्यापितास्वपित्र्यः पुत्रविवाहनिमित्तं नान्दीमुखं श्राद्धं
विधाय। विवाह्यं पुत्रं मंगलतूर्यवेदघोषेण क न्यापितृगृहमानयति। कन्यापिता च मातृपूजापूर्वकं कन्याविवाहनिमित्तकं
पितृभ्यो नान्दीमुखं श्राद्धं विधाय मंडपद्वारसम गतं वरं अभ्युत्थानादिभिः प्रतीक्ष्य मधुपर्केणार्चयेत्। तद्यथा। अर्घयिता २५
२७ आसनमानाय्य तस्यासनस्य पश्चान्निषण्णं अर्घ प्रतिसाधु भवानास्तामर्चयिष्यामो भवन्तमिति ब्रवीति। ततः अर्घकमुदकं पात्रं वि
ष्टरं पाद्यं पादार्थं तस्यासनस्य पश्चान्निषण्णं अर्घयिता साधु भवानास्तामर्चयिष्यामो भवन्तं। इति ब्रवीति। ततः अर्घकमुदकपात्रं विष्टरं पा
द्यं पात्रे मुदकमर्घमाचमनीयं मधुपर्कं तत्समीपमानयन्ति। अथार्घयिता पर्कं विष्टरमादाय तिष्ठति। अन्यः कश्चित्प्रत्यक्षेण विष्टरो
विष्टरो विष्टर इति त्रिः प्राह। प्रतिगृह्णातु इत्यर्घस्य हस्तयोः ददाति। अर्घं च बध्नासि समानानामुद्यतामिव सूर्य्यः। इमं तमभिति

ष्टामि यमाकश्चातिदासतीत्यनेन मंत्रेण विष्टरमासने विन्यस्य तदुपर्युपविशति। ततोऽन्येन पाद्यं पाद्यं पाद्यमिति श्राविते पादार्थमु
दकमर्घयिताऽर्घ्याय प्रतिगृह्णातामित्युक्त्वा समर्पयति। अथार्घ्यः स्वपात्रं भूमौ निक्षिप्यांजलिना जलमादाय विराजो दोहोऽसि वि
राजो दोहमशीय मयि पाद्यायै विराजो दोहः इति मंत्रेण ब्राह्मणो दक्षिणं पादं प्रक्षाल्य तथैव वामं प्रक्षालयति। क्षत्रियादयस्त्वर्घ्याः
सव्यं प्रक्षाल्यानेनैव विधिना दक्षिणं प्रक्षालयन्ति। ततः पुनर्विष्टरो विष्टर इत्यन्येन श्राविते प्रतिगृह्णातामिति यजमानेन दत्तं
विष्टरं प्रतिगृह्य वर्ष्मोऽस्मीति मंत्रेण पादयोरधस्तात् निदधाति। ततोऽर्घोऽर्घोऽर्घ इत्यन्येन श्राविते अर्घयिता प्रतिगृह्णातामित्यु
क्त्वाऽर्घ्यायार्घं आपः स्थ युष्माभिः सर्वान् कामानवाप्नवानीति मंत्रं पठितवते प्रयच्छति। अर्घ्यश्चार्घं प्रतिगृह्य मूर्द्धपर्यन्तमानीय स
मुद्रं वः प्रहिणोमि स्वां योनिमभिगच्छत। अरिष्टा अस्माकं वीरा मा परासेचि मत्पय इत्यनेन मंत्रेण निनयन्नभिमंत्रयते। अथाचम
नीयमाचमनीयमाचमनीयमित्यन्येन श्राविते अर्घयिताऽर्घ्याय प्रतिगृह्णातामित्युक्त्वाऽऽचमनीयं प्रयच्छति। अर्घ्यश्च प्रतिगृह्य
आमाऽगन्यशसा संसृज वर्चसा। तं मा कुरु प्रियं प्रजानामधिपतिं पशूनामरिष्टिं तनूनामिति मंत्रेण सकृदाचम्य स्मार्त्तमाच

मनं करोति। अथ मधुपर्क्कः। मधुपर्क्को मधुपर्कं इत्यन्येनोक्तो यजमानः हस्ते स्थितं मधुपर्कं मित्रस्य त्वा चक्षुषा प्रतीक्षे इति मं
त्रेण प्रतीक्ष्य देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यां प्रतिगृह्णामीति मंत्रेण अंजलिना प्रतिगृह्य सव्ये पाणौ निधा
य दक्षिणस्य पाणेरुपकनिष्ठिकया अंगुल्या नमः श्यावास्यायान्नशने यत्त आविद्धं तत्ते निष्कृन्तामीति मंत्रेण सकृदालोड्य भूमौ स
कृत् अनामिकाङ्गुष्ठाभ्यामादाय बहिर्निक्षिप्य पुनर्द्विर्वारमालोडनं निरूक्षणं च कार्यं। ततो यन्मधुनो मधव्यं परम
ं रूपमन्नाद्यं तेनाहं मधुनो मधव्येन परमेण रूपेणान्नाद्येन परमो मधव्योऽन्नादोऽसानीति मंत्रेण अनामिकाङ्गुष्ठाभ्याम
दाय त्रिः प्राश्नाति। मधु वाता ऋतायत इत्या घाभिस्त्रिसृभिर्ऋग्भिः प्रत्यृचं त्रिः प्राश्नाति वा। प्राशितशेषं पुत्राय शिष्याय
२६ वा दद्यात्। सर्वं वा भक्षयेत्। पूर्वस्यां वा दिशि असंचरप्रदेशे प्रक्षिपेत्। ततस्तमेन निर्विघ्नं वम्य। वाङ्म आस्येऽस्त्विति कनिष्ठिकाग्रेण मुखं स्पृ
शति। नसोर्म्मे प्राणोऽस्त्विति दक्षिणवामनासारन्ध्रे। अक्ष्णोर्म्मे चक्षुरस्त्विति चक्षुषी। कर्णयोर्म्मे श्रोत्रमस्त्विति दक्षिणश्रोत्रसम्मृ
श्य पुनः कर्णयोर्म्मे श्रोत्रमस्त्विति वामी। एवं बाह्वोर्म्मे बलमस्त्विति दक्षिणेतरेनावबाह्वोः। ऊर्वोर्म्म ओजोऽस्त्विति युगपदूरू। अरिष्टानि मे

ज्ञानि तत्तूष्णीं वामे सहसंश्रि निशिनः प्रभृती निपादांतानि सर्व्वाण्यंगान्युपनाभ्यां हस्ताभ्यामालभेत। एवमावांतोदकायप्रवद्ध हस्तायजमानः। गो
गौर्ग्गौर्वा लभ्यतामिति निष्क्रम्य सा शानितानोर्घ्यः माता रुद्राणां दुहिता वसूनां स्वसादित्यानाममृतस्य नाभिः। प्रनुवोचं चिकितुषे जनाय मा गा
मनागामदितिं वधिष्ट मम च अमुकशर्म्मणोऽस्य च पाप्मानं हनामीति गवालंभपक्षे प्रनिष्क्रम्य तत्र सर्गपृक्तेन माता रुद्राणामित्यादिना
प्राह तत्तमित्युपांशूक्त्वा ओमुत्सृजत तृणान्यत्तु प्रनिष्क्रम्य आशानितावनः वहिः शालायामीशान्यां दिशि वक्त्रहस्तायां सिकता छन्नो
यां वेदिकायां लौकिकं निर्म्मथ्यं वाग्निं स्थापयित्वा। पश्चादग्नेस्तृणपूलकं कटं वा स्थापयेत्। अथ कन्यापिता वस्त्रवत्तूष्यं वा आयुष
यच्छति। वस्त्रं वत्तेषु मयि ओं नीराछप निबध्नं वासा वाहकेष्टीनामसि शाम्निपावा। शतं च जीव शरदः सुवर्च्चा रयिं च पुत्राननुसंव्ययस्वा
युष्मतीदं परिधत्स्व वास इत्यनेन मन्त्रेण प्रथमं कुमारीं परिधापयति। द्वितीयं या अकृन्तन्नवयं या अतन्वत तायाश्च देवी स्तन्तूनभितो ततन्थ ता
स्त्वा देवी जरसे संव्ययस्वायुष्मतीदं परिधत्स्व वास इति मन्त्रेण। स्वयं च परिधास्यै यशोधास्यै दीर्घायुत्वाय जरदष्टिरस्मि। शतं च जीवामि
शरदः पुरूची रायस्पोषमभिसंव्ययिष्य इति मन्त्रेण प्रथमं परिधत्ते। यशसा मा द्यावापृथिवी यशसेन्द्राबृहस्पती। यशो भगश्च मा विदद्य

शामाप्रतिपद्यतामिति द्वितीयं अथ कुमार्याः पिता एनां परिहिताहतसदशवस्त्रां कन्यां वरं समंजयति परस्परं समंजेथामिति प्रे
षाणां ततो वरः कन्या संमुखीभूतः समंजन्तु विश्वेदेवाः समापो हृदयानि। समातरिश्वा सं धाता समु देष्ट्री दधातु नौ। इत्यादिकं मंत्रं
२७ पठति। अथ कन्यादानं कर्त्ता तिपित्रादिः कन्यादानाधिकारी। तत्र वाक्यं। अमुकगोत्रस्यामुक ३ प्रवरस्यामुकशर्म्मणः प्रपौत्राय। अमुक
गोत्रस्यामुकप्रवरस्यामुकशर्म्मणः पौत्राय अ मुकगोत्रस्य अमुक ३ प्रवरस्य अमुकशर्म्मणः पुत्राय इति वरपक्षे। अमुकगो
२३ त्रस्य अमुकामुकप्रवरस्य अमुकशर्म्मणः प्रपौत्रीं अमुकगोत्रस्य अमुक ३ प्रवरस्य अमुकशर्म्मणः पौत्रीं अमुकगोत्रस्य अमुक ३ २०
प्रवरस्य अमुकशर्म्मणः पुत्रीं एवमेव पुनर्वारत्रयं अभिहिते अथ कन्यापिता कुशजलाक्षतपाणिः उदङ्मुखोपविष्टश्च प्राङ्मु
खोपविष्टाय वराय प्रत्यङ्मुखोपविष्टां कन्यां अमुकगोत्राय अमुक ३ प्रवराय अमुकशर्म्मणे ब्राह्मणाय इति ब्राह्मणवरपक्षे इतरव
रपक्षे वर्म्मणे अमुकगुप्ताय अमुकदासाय इति विशेषः। अमुकगोत्रां अमुक ३ प्रवरां अमुकनाम्नीं इमां कन्यां सालंकारां प्रजापतिदे
वतां कौशाक्षतपुष्पाक्षतजलोक्षितां मास्तिनात्र समफलप्राप्तिकामो यावज्जीवनं तु भ्यमहं संप्रददे इत्युक्त्वा सकुशाक्षतजलं कन्या

दक्षिणहस्तं च न दक्षिणपदस्योपदध्यात् अथ घोष्याद्दद्यात्तु पृथिवी वा प्रतिगृह्णा वित्यनेन मंत्रेण तां गृह्णी। यात्रा अथ यकोदा रितिकामसूक्तं पठेत्
तः कृते तु कन्यादानप्रतिष्ठार्थं सुवर्णं गोमिथुनं च दक्षिणां दद्यात् अत्र वा नात्र अन्यदपि यो न कालेन सुवर्णं वञन तां ग्रामं महिष्यश्वग्रामा
दिकन्यां तामृषाभ्यर्नवं ददाति। अन्योपि वीप्रवादयः यथासंभवं यातकं प्रयच्छेत्। कन्यया तर्कीदामाति प्रयच्छन्ति। अत्र देशाचारतो व्यवस्था।
एवं पित्रा दत्तां गृहीत्वा प्रतिग्रहस्थानान्निष्क्रामति। यदेषि मनसा दूरं दिशोनुपवमानो वा हिरण्यपर्णो वि कर्णः स त्वा मन्मनसां क
नोत्वमुकिड्ट्यनेन मंत्रेण। अथ निष्क्रमणप्रभृत्य कोजलपूर्णं कलशं स्कंधे निधाय दक्षिणेनाग्नेर्दक्षिणतः गच्छ तिष्ठति तत्र तूष्णीं
वा अग्निषेकपर्यन्तं। अथ नौ वहूवरौ अग्निसमीपमागतौ कन्यायाः पिता पवस्यां समीक्ष्या मिति मंत्रेण समीक्षयति। ततः अग्ने
पितावरः समीक्षमाणां कन्यां समीक्षमाणः अघोरचक्षुरपतिघ्न्येधि शिवा पशुभ्यः सुमनाः सुवर्चाः। वीरसूर्देवकामा स्योना शन्नो भ
व द्विपदे शं चतुष्पदे। सोमः प्रथमो विविदे गन्धर्वो विविद उत्तरः। तृतीयो अग्निष्टे पतिस्तुरीयस्ते मनुष्यजाः। सोमोऽददद्गन्धर्वाय गन्धर्वो
ददद्ग्नये। रयिं च पुत्रांश्चादादग्निर्मह्यमथो इमां। सा नः पूषा शिवतमामेरय यस्यामुशन्तः प्रहराम शेपं यस्य

यं कामा। फ

मुक्तामावदेवो निवेष्य इत्यादिकौं वरुणो मंत्रान्पठति। ततः प्रदक्षिणमग्निं परीत्य पश्चादग्नेः पूर्वस्यां पितृतेजनी कटं यो नन्यते स्वदक्षिणं पाद
मग्रेकृत्वा पविशति वृतः तस्य दक्षिणतो वधूः। ततः अग्न्युपवेशनादि त्वरूं पर्युक्षणांतं कुर्यात्। इध्मांश्च विशेषः। शमीपलाशमिश्रा
२८ लाजाः अथमाश्च खंडं लोहितमानडुहं चर्म। कुमार्या भ्राता शूर्पी। दृढपुरुषः। आचार्याय वरं दद्यां। इत्येतावं निवप्रू नितपकल्पयेत्
नपोक्षेत्। ततः स्रुवमादाय दक्षिणं जाधास्पृश्य घारादि पमागोमहा व्याहृतिसर्वप्रायश्चित्तं प्रसावृत सवाङ्कसनाद्यं भू
२८ तयाप्यातान ः अग्निर्वित्यादिकाः परं स्पृत्य विली ता अनव सवाङ्कुयाश्च प्राशनांतं निवापयं मृत्पविनि। तद्यथा। प्रजाप २८
नयस्वाहा। इदंप्रजापतये। इंद्राय स्वाहा। इदमि न्द्राय। अग्नये स्वाहा। इदमग्नये। सोमाय स्वाहा। इदंसोमाय। ॐ भूः स्वाहा। इद
मग्नये। ॐ भुवः स्वाहा। इदंवायवे। ॐ स्वः स्वाहा। इदं सूर्याय। त्वन्नो अग्ने वरुणस्य विद्वान्देवस्य हेडो अवयासिसीष्ठाः। यजिष्ठो वह्नितमः शो
शुचानो विश्वा द्वेषांसि प्रमुमुग्ध्यस्मत्स्वाहा। इदमग्नीवरुणाभ्यां। सत्वन्नो अग्ने वमो भवोती नेदिष्ठो अस्या उषसो व्युष्टौ। अव यक्ष्व नो वरुण
रराणो वीहि मृडीकं सुहवो न एधि स्वाहा। इदमग्नीवरुणाभ्यां। अयाश्चाग्नेस्यनभिशस्तिपाश्च सत्यमित्त्वमयासि। अयानो यज्ञंव

हास्यया नो धेहि भेषजं स्वाहा। इदमग्नयेऽयसे। ये ते शतं वरुण ये सहस्रं यज्ञियाः पाशा वितता महान्तः तेभिर्नो अद्य सवितोत विष्णुर्विश्वे मुं
ञ्चन्तु मरुतः स्वर्काः स्वाहा। इदं वरुणाय सवित्रे विष्णवे विश्वेभ्यो देवेभ्यो मरुद्भ्यः स्वर्केभ्यः। उदुत्तमं वरुण पाशमस्मदवाधमं वि मध्यमं श्र
थाय। अथा वयमादित्य व्रते तवानागसो अदितये स्याम स्वाहा। इदं वरुणाय। ब्रह्मा ब्रान्हा हुत्वा। तत्र राष्ट्रभृतो यथा। ऋताषाडृतधा
माग्निर्गन्धर्वः स न इदं ब्रह्म क्षत्रं पातु तस्मै स्वाहा वाट्। इदमृताषाहे ऋतधाम्नेऽग्नये गन्धर्वाय। ऋताषाडृतधामाग्निर्गन्ध
र्वस्तस्यौषधयोऽप्सरसो मुदो नाम ताभ्यः स्वाहा। इदमोषधिभ्योऽप्सरोभ्यो मुद्भ्यः। संहितो विश्वसामा सूर्यो गन्धर्वः। स न इ
दं ब्रह्म क्षत्रं पातु तस्मै स्वाहा वाट्। इदं संहिताय विश्वसाम्ने सूर्याय गन्धर्वाय। संहितो विश्वसामा सूर्यो गन्धर्वस्तस्य
मरीचयोऽप्सरस आयुवो नाम ताभ्यः स्वाहा। इदं मरीचिभ्योऽप्सरोभ्य आयुभ्यः। सुषुम्णः सूर्यरश्मिश्चन्द्रमा गन्धर्वः। स न इदं ब्रह्म क्ष
त्रं पातु तस्मै स्वाहा वाट्। इदं सुषुम्णाय सूर्यरश्मये चन्द्रमसे गन्धर्वाय। सुषुम्णः सूर्यरश्मिश्चन्द्रमा गन्धर्वस्तस्य नक्षत्राण्यप्सरसो भेकु
रयो नाम ताभ्यः स्वाहा। इदं नक्षत्रेभ्योऽप्सरोभ्यो भेकुरिभ्यः। इषिरो विश्वव्यचा वातो गन्धर्वः। स न इदं ब्रह्म क्षत्रं पातु तस्मै स्वाहा वाट्।

इदमिषिराय विश्वव्यचसे वाताय गंधर्वाय । इषिरो विश्वव्यचा वातो गंधर्वस्तस्यापो ऽप्सरस ऊर्जो नाम ताभ्यः स्वाहा । इदमद्भ्यो ऽप्सरोभ्य ऊर्ग्भ्यः ।
भुज्युः सुपर्णो यज्ञो गंधर्वः स न इदं ब्रह्म क्षत्रं पातु तस्मै स्वाहा वाट् । इदं भुज्यवे सुपर्णाय यज्ञाय गंधर्वाय । भुज्युः सुपर्णो यज्ञो गंधर्वस्तस्य
29 दक्षिणा अप्सरसः स्तावा नाम ताभ्यः स्वाहा । इदं दक्षिणाभ्यो ऽप्सरोभ्यः स्तावाभ्यः । प्रजापतिर्विश्वकर्मा मनो गंधर्वः । स न इदं ब्रह्म क्षत्रं पा
तु तस्मै स्वाहा वाट् । इदं प्रजापतये विश्वकर्मणे मनसे गंधर्वाय । प्रजापतिर्विश्वकर्मा मनो गंधर्वस्तस्य ऋक्सामान्यप्सर
स एष्टयो नाम ताभ्यः स्वाहा । इदमृक्सामेभ्यो ऽप्सरोभ्य एष्टिभ्यः । केचित्त्वन्यथा मंत्रप्रयोगं कुर्वन्ति तत्प्रदर्श्यते । ऋत २९
२९ षाडृतधामाग्निर्गंधर्वः स न इदं ब्रह्म क्षत्रं पातु तस्मै स्वाहा वाट् स्वाहा इति प्रथमः । तस्यौषधयो ऽप्सरसो मुदो नाम ताभ्यः स्वाहेति
द्वितीयः । एवं सर्वत्र मंत्रेषु । अस्मिन्नपि पक्षे त्यागाः पूर्ववत् । अथ जयहोमः । चित्तं च स्वाहा । इदं चित्ताय । चित्तिश्च स्वाहा । इदं चित्त्यै । आ
कूतं च स्वाहा । इदमाकूताय । आकूतिश्च स्वाहा । इदमाकूत्यै । विज्ञातं च स्वाहा । इदं विज्ञाताय । विज्ञातिश्च स्वाहा । इदं विज्ञात्यै । म
नश्च स्वाहा । इदं मनसे । शक्वरीश्च स्वाहा । इदं शक्वरीभ्यः । दर्शश्च स्वाहा । इदं दर्शाय । पौर्णमासं च स्वाहा । इदं पौर्णमासाय । बृहच्च स्वाहा ।

हा इदं बृहते । रथंतरं स्वाहा । इदं रथंतराय । विहवेत्येवमादीनां पदानां चतुर्थ्यन्तानां केवलानि दस्मां प्रलंकृतः नंत्येतानि देवतापदा
नि किंतु मंत्रा एते मंत्राश्चयथाम्नाता एव प्रयुज्यन्ते । प्रजापतिर्जया । निंद्राय वृष्णे प्रायच्छदुग्रः पृतनाजयेषु । तस्मै विशः समनमन्त सर्वाः
स उग्रः स इह हव्यो बभूव स्वाहा । इदं प्रजापतये जयानिंद्राय । अथाभ्यातानाः । अग्निर्भूतानामधिपतिः स मावत्वस्मिन्ब्रह्मण्यस्मिन्क्षत्रस्यामा
शिष्यस्यां पुरोधायामस्मिन्कर्मण्यस्यां देवहूत्यां ॥ | स्वाहा । इदमग्नये भूतानामधिपतये । इन्द्रो ज्येष्ठानामधिपतिः स मावत्वित्ये
वमादिष्वादशकान्तो मंत्रः । इदमिंद्राय ज्येष्ठाना | मधिपतये । एवं समावत्वस्मिन्नित्यादि वक्तव्यम् । एषु सर्वमंत्रेषु । यमः पृथिव्या य
मः पृथिव्या । अधिपतिः । इदं यमाय पृथिव्या अ | धिपतये । वायुरंतरिक्षस्याधिपतिः । इदं वायवेऽन्तरिक्षस्याधिपतये । सूर्यो
दिवोऽधिपतिः । इदं सूर्याय दिवोऽधिपतये । चन्द्रमा नक्षत्राणाम | धिपतिः । इदं चन्द्रमसे नक्षत्राणामधिपतये । बृहस्पतिर्ब्रह्मणोऽधिपतिः
इदं बृहस्पतये ब्रह्मणोऽधिपतये । मित्रः सत्यानामधिपतिः । इदं मित्राय सत्यानामधिपतये । वरुणोऽपामधिपतिः । इदं वरुणाया
पामधिपतये । समुद्रः स्रोत्यानामधिपतिः । इदं समुद्राय स्रोत्यानामधिपतये । अन्नं साम्राज्यानामधिपति तन्मावत्व । मित्र

साणणमित्रा। इदमन्नाय साम्राज्यानामधिपतये। सोमऽओषधीनामधिपतिः। इदं सोमायौषधीनामधिपतये। सविता प्रसवानामधि
पतिः। इदं सवित्रे प्रसवानामधिपतये। रुद्रः पशूनामधिपतिः। इदं रुद्राय पशूनामधिपतये। उदकोपस्पर्शनं। त्वष्टा रूपाणामधि
पतिः। इदं त्वष्ट्रे रूपाणामधिपतये। विष्णुः पर्वतानामधिपतिः। इदं विष्णवे पर्वतानामधिपतये। मरुतो गणानामधिपतयस्ते मावंत्व
मित्रा। इदं मरुद्भ्यो गणानामधिपतिभ्यः। पितरः पितामहाः परेवरे ततास्ततामहाः। इह मावंत्व स्मिन्ब्रह्मण्यीत्यादि समानं।
इदं पितृभ्यः पितामहेभ्यः परेभ्यो वरेभ्यस्ततेभ्यस्त तामहेभ्यः। उदकस्पर्शनं। एते अष्टादश मंत्राः। अभ्यातानसंज्ञिकाः। अग्निरै ३०
३० तु प्रथमो देवतानां ॐ सोस्याः प्रजां मुंचतु मृत्युपा शात्। तदयं राजा वरुणोऽनुमन्यतां यथेयं स्त्री पौत्रमघन्न रोदात्स्वाहा। इ
दमग्नये। इमामग्निस्त्रायतां गार्हपत्यः प्रजामस्यै नयतु दीर्घमायुः। अशून्योपस्था जीवतामस्तु माता पौत्रमानंदमभि विबुध्यतामि ता२
यं स्वाहा। इदमग्नये। द्यास्मिनो अग्ने दिवा पृथिव्या। विश्वानि धेह्ययथा यजत्र। यदस्यां महि दिवि जातं प्रशस्तं तदस्मासु द्रविणं धेहि
चित्रं स्वाहा। इदमग्नये। सुगं नु पन्थां प्रदिशन्न एहि ज्योतिष्मध्येह्यजरन्न आयुः। अपैतु मृत्युरमृतं न आगाद्वैवस्वतो नो अभयं कृ

त्रा२

मो

णोवुस्वाहा। इदं वैवस्वतया। परंमृत्योऽअनुपरेहि पंथां यस्ते अन्य इतरो देवयानात्। चक्षुष्मते शृण्वते ते ब्रवीमि मानः प्रजां रीरिषो मोत वीरा
स्वाहा। इदं मृत्यवे। पकसंस्रवप्राशनांते ऊद्धृयादिति। छिन्नि। उदकोपस्पर्शः। कुमार्या भ्राता उपकल्पितान् शमीपलाशमिश्रान्लाजा
नश्रूर्पकृतानश्वेनांलिना गृहीत्वा कुमार्यांजलावावपनि। तान्लाजान्स्वप्राङ्मुखी निषता कुमारी सव्यहस्तसहितेन दक्षिणहस्तेनश्रं
ञ्जलिना विप्राहं जुहोति। अर्यमणं देवं कन्या अग्निमयक्षत। स नो अर्यमा देवः प्रेतो मुंचतु मापतेः स्वाहा। इत्यनेन मंत्रेणाद्
तीयांशं जुहोति। इदमर्यम्णे। इयं नार्युपब्रूते लाजानावपंतिका। आयुष्मानस्तु मे पतिरेधंतां ज्ञातयो मम स्वाहा। इत्यनेन
मंत्रेणाञ्जलिस्थितानां लाजानामर्द्धं जुहोति। इदमग्नये। इमांल्लाजानावपाम्यग्नौ समृद्धिकरणं तव। मम तुभ्यं च संवद
नं तदग्निरनुमन्यतामियं स्वाहा। इत्यनेन मंत्रेण सर्वांल्लाजान् जुहोति। इदमग्नये। मंत्रत्रयं कन्यैव पठति। अथ कुमार्याः सां
गुष्ठं दक्षिणं हस्तं वरो गृह्णाति। गृभ्णामि ते सौभगत्वाय हस्तं मया पत्या जरदष्टिर्यथासः। भगो अर्यमा सविता पुरंधिर्मह्यं त्वादु
र्गार्हपत्याय देवाः। अमोऽहमस्मि सा त्वं सा त्वमस्यमोऽहं। सामाहमस्मि ऋक्त्वं द्यौरहं पृथिवी त्वं। तावेहि विवहावहै सह रेतो

ल२

२रं

स्वाहा। प्रजां प्रजनया वर्ह्धय त्वा। विश्वा वर्ह्धव ह्वानाः तस्मं तु जनर्वृह्वयः संप्रियो ।।। वि ष्णू मुम नस्पमानौ। पश्ये मशनदः शतं जीवेम शरदः शतं
शृणुयाम शरदः शतं धं मित्यनेन मंत्रेण संदर्शनं ॥ अथ कुमार्या दक्षिणं पादं दक्षिणेन हस्तेन गृहीत्वा आरोहेमम श्मानम श्मेव त्वं स्थिरा
भव। अभितिष्ठ पृतन्यतो ववाधस्व पृतनायत इत्यनेन मंत्रेण। अश्मेन त्वं नतो व्यवस्थितस्याश्मन उपरि विन्यस्तः करोति। अथाश्मन्याहृढायां कु
मार्याः कोगाथांगायनि सरस्वति प्रेदमवसुभगे वाजिनीवति यां त्वा विश्वस्य भूतस्य प्रजायामस्याग्रतः। यस्यां भूत धं समभव
धस्या विश्वमिदं जगत्। तामद्य गाथां गास्यामि या स्त्रीणामुत्तमं यश इत्यंत। अथ वधूवरौ प्रदक्षिणमग्निं परिक्रामतः। तु
३१ भ्यमग्रे पर्यवहन्सूर्यां वहतुना सह। पुनः पतिभ्यो जायां दा अग्ने प्रजया सह इत्यंतस्य मंत्रस्य पठनपरिनिस्यांते। एवं पुनर्द्वि ३१
तीयं लाजावपनादि पूर्विक्रमणं तं कर्मनि विशिषं भवति। ततस्तृतीय परिक्रमणानं तरं कुमार्या भ्राता शूर्प्पकोणप्रदेशेन स
र्वान्लाजान्कुमार्यंजलावावपति। तां निष्टतीं कुमारी भगाय स्वाहेत्यंतेन जुहोति। इदं भगाय। ततः समावानान्तं सौ वकुर्थं प
रिक्रमणं कुर्वतः। नेतत्र थास्ति। अथ प्रजापतये स्वाहेति निब्रह्माग्न्याज्यादि इदं प्रजापतय इति त्यागं विधाय पत्नीं वधूं दर्शी सप्त

पदानि प्रक्रामयति। तद्यथा। एकमिषे विष्णुस्त्वानयत्विति वरेणोक्तमंत्रे वधूरेकं पदमुदग्ददाति। द्वे ऊर्जे विष्णुस्त्वानयत्विति द्वितीयं।
त्रीणि रायस्पोषाय विष्णुस्त्वानयत्विति तृ[illegible] तृतीयं।
चत्वारि मायोभवाय विष्णुस्त्वानयत्विति चतुर्थं। पंच पशुभ्यो। विष्णुस्त्वानयत्विति पंचमं। षड्ऋतुभ्यो। विष्णुस्त्वानयत्विति षष्ठं। सखे सप्तपदा भ
व। सा मामनुव्रता भव विष्णुस्त्वानयत्विति सप्तमं। एवं वर एकैकं मंत्रमुच्चार्याचार्यः सप्त पदानि दापयेत्पश्चात्तु [illegible] दक्षिणपादेन।
अथ वरः [illegible]दुदकुंभादुदकमादाय वधूमू र्द्धन्यभिषिंचति। आपः शिवाः शिवतमाः शांताः शांततमास्तास्ते कृण्वंतु भेषजं।
मित्यनेन मंत्रेण। पुनः अथवा उदकमादायापो हि ष्ठेति वधूं पश्चिमादायथैव मूर्द्धन्यभिषिंचति। अथ वरः सूर्यमुदीक्षयेति वधूं प्र
क्षयति सा वधूरपि तां सती सूर्यमुदीक्षते तच्चक्षुरित्यादि शृणुयाम शरदः शतमित्येतं मंत्रं स्वयं पठित्वा। अथ वरो वध्वाः दक्षिणांसस्यो
परि हस्तं नीत्वा तस्याः हृदयमालभते। मम व्रते ते हृदयं दधामि मम चित्तमनु चित्तं ते अस्तु। मम वाचमेकमना जुषस्व प्रजापतिष्ट्वा
नियुनक्तु मह्यमिति त्वं तेन मंत्रेण। अथ हृदयालंभनानंतरं वरो वधूमभिमंत्रयते। सुमंगलीरियं वधूरिमां समेत पश्यत। सोम

२५श्वा५ ५२ ॐ

यमस्मै देवा यो पाथ्यासि विपन्नेनेत्यंतेन मंत्रेण। अत्र शिष्टसमाचारात् वधूं वरस्य वामभागेनुपवेशयंति। तस्याः सीमंते वरेण सिंदूरं द-

यंति। अथाग्नेः प्रागुदग्भागे पूर्वकल्पितेष्वनुगुप्त आगानेयुत्तरतोग्नेः प्राग्ग्रीवेष्वास्तीर्णेषु हे वर्म्मणि तां वधूं दृढपुरुषः स्थापयित्वोपवेशयति। इह

गावो निषीदंत्विहाश्वा इह पूरुषाः। इहो सहस्रदक्षिणो यज्ञ इह पूषा निषीदत्विति मंत्रेण। यद्वाओं मानादृढपुरुषः पश्चिमेप्यस्मिन्प्रवेशाप-

५६ वेशयति वधूं ततः आगत्य पूर्ववत् यथास्थानमु- पविश्य ब्रह्मान्वारब्धो वरः अग्नये स्विष्टकृते स्वाहा। इदमग्नये स्विष्टकृते। इति

३२ स्विष्टकृद्धोमं विधाय संस्रवान् प्राश्य पूर्णपा- त्रं वरनयानत्यतदद्यात् स्वकीयाचार्याय वरं ददाति। ब्राह्मणेभ्यो ... त्रियथा ३२

त्रमाचार्याय दद्यात्। अनंतरं सुवर्णादिदक्षिणां यथाशक्ति द्धं यथाशक्ति ब्राह्मणेभ्यो दानं संकल्पयेत्। ग्राममध्ये वरं वधूं तिलकेनाशि-

षेवानप्राश्नं तिलककरणं। कृतवंदनमंत्र विप्राशीर्वचनप्रतिष्ठामंत्र पागदिकं यथाकुलं यथादेशसमाचारं तत्र तत्र क्रियमाण-

मनुमन्येतानादिवावद्विवाहस्तदारभ्य मितकृत्वं दर्शयति वरो वधूं। नात्र विहस्य दानानंतरमवेनापयाध्रुवमीक्षस्वेति प्रेषिता वधूः ध्रुव-

मसि ध्रुवं त्वा पश्यामि ध्रुवैधि पोष्ये मयि मह्यं त्वादाद्बृहस्पतिः। मया पत्या प्रजावती संजीव शरदः शतम् इत्यंतेन मंत्रेण वरेण ध्रुवमी-

मयि

रुता। साच ध्रुवः यदि ऋक्षं न पश्येत् तथापि पश्यामीत्येवं वदेत्। विवाहादारभ्य त्रिरात्रं अक्षारालवणाशिनौ स्यातां जायापती। अथः स्वह्न
वहितस्यू गागाध्याभृते शायीयातां त्रिरात्रमेव। संवसन्तं समग्रं मिथुनं नोपेयातां। द्वादशरात्रं षड्रात्रं त्रिरात्रं वा भवति। एते विकल्पाः। मिथुन
कनण शक्यपेक्षया। अत्र त्रिरात्रपक्षः। अयमेव तु पक्षोऽधुना कालं दृष्ट्वा सूत्रव्याख्याने विहितः। इति विवाहकर्मपद्धतिः॥ उपयमनप्रभृत्यौ
पासनस्य परिचरणं। अथ औपासनस्य आवसथ्यस्याग्नेः परिचरणं उपासनं व्याख्यास्यामः। कथं। उपयमनमिति उपयमनकु
शादानमारभ्याकार्यः उपयमनकुशादीयसमिधस्याधानपर्यन्तं कुर्यादिति याज्ञिकाः। अस्तमितानुदितयोः। तस्य काल
नियममाह अस्तमितानुदितयोः। अस्तमितश्च अनुदितश्च अस्तमितानुदितौ तयोस्तथा। सूर्ययोः सूर्यस्य। समयानुदिता
स्यां उपलक्षितयोः कालयोरित्यर्थः। तत्रास्तमितलक्षणं छन्दोगपरिशिष्टे यावत्सम्यङ् न भाव्यन्ते नभस्यृक्षा। सर्वतः नवलोहि
तमापोनि तावत्सायं तु हूयते। अनुदितस्य छ विधिं। अनुदितः समयाध्युषितश्च तत्रानुदितः स्पष्टतारकोपलक्षितः। ततः परमुदयात्
प्राक् समयाध्युषितः तथा च मनुः। उदितेऽनुदिते चैव समयाध्युषिते तथा। सर्वथा वर्त्तते यज्ञ इतीयं वैदिकी श्रुतिरिति सिंहूणादि

त्यमंडलदर्शनापलक्षितमुदितः। तत्रवाऽसनेऽदितानां नियमेनानुदितहोमः। सूर्योहवाअग्निहोत्रंइत्यादेरस्य तस्मादुदितेहो।मिनांवि
छिन्नमग्निहोत्रंमन्यामहइत्युक्तेनश्रुतिसमाम्नायेनानुदितहोमनिंदापूर्वकमनुदितहोमस्यसमर्थितत्वात्। छंदोगानांउदितानु
दितयोर्विकल्पः। उदितस्त्वनुदितवत्सिगोमिश्रकनाम्नाऽऽश्वलायनानांतुअनुदितहोमनियमः। तथाचापस्तंबब्राह्मणंप्रातःप्रात
रनृतंतेवदंतिपुरोदयात्जुह्वतियेऽग्निहोत्रंदिवा कीर्त्यमदिवाकीर्त्यंतःसूर्योज्योतिर्नतदाज्योतिरेषामितिअनुदितहोम
निंदार्थवादःपुनःसत्यंतस्मादुदितेहोतव्यमिति उदितहोमविधानार्थः। होमद्रव्यनियममाह। दध्नातंडुलैरन्नेनिर्वा।जुह्
३३ याज्ञदग्ध्वागव्येनातंडुलैर्व्रीहिमयैः। अश्रुतेसत्य कोर्यवैः।। वाविकल्पेन। एतेषामन्यतमेत्यर्थः। अथयथाग्निहोत्रप्रजापतयेस्वा। ३३
हेतिसायंसूर्यायस्वाहाप्रजापतयेस्वाहेतिप्रातस्तत्रसायंअग्नयेस्वाहेतिपूर्वाहुतिः। प्रजापतयेस्वाहेत्युत्तरांहुत्वासर्वत्रप्र
जापतियागउपांशुस्वाहाकारश्चपिप्रयागस्त्वाघारवत्स्वाहान्तोपिमानसः। तथाप्रातःसूर्यायस्वाहेतिपूर्वा प्रजापतयेस्वाहेत्युत्तरा
न्वाहुतिः। त्यागाश्चप्रयोगोवक्ष्यतेनैवयजमानेनकार्याः। कृतःप्रथमनक्षत्रोदयेअस्तमनेश्चग्रामीफलयोगाद्वानिकोत्पायनवचनान्तेष

श्मनं हि द्रव्यस्य स्वपरित्यागः। ततश्च प्रसेवसनायजमानेन यथाकालं यथादैवतं च विना। आचांतेन प्राङ्मुखोपविष्टेन सर्वकर्म्म कर्त्तव्यं।
धतत्र सायमादि प्रातरंतमेकं कर्म्म प्रवक्ष्यते निर्वचनात् सायंहोमश्च येनैव प्रातर्होमः कर्त्तव्यश्च। तथा येन होत्रा सायं हुतं तेनैव प्रा-
तर्होतव्यं। यजनार्थं त्वन्नेनैव समाप्तिरिति नित्यायाश्च तथा दधितंडुलयवानामलाभे श्यामाकनीवारवेणुयवकंदमूलफलजलसत्या-
नी पूर्वपूर्वालाभे परं परं नित्यहोमाय ग्राह्यं। कंदमूलफलादिफलमाम्रादिरस्यैव कर्म्मणः काम्यसंयोगमाह ग्राममाशंसे।
मित्रावरुणयोरुमाशंसावश्विनावुभौ ग्राममानिंद्र ग्रामसूर्यस्य मुपाशंसं वर्त्ततां मयि पुण्यः स्वाहेति। कंदमूलफलादि फलमाम्रादि
पूर्वांगनकामा ग्राममाशंसेत्यादिना मंत्रेण। नका मा पत्नी पूर्वामाहुतिं जुहुयात्। अत्र पूर्वांगनकामो यस्य कोऽर्थः। कि-
न्नित्ययोर्द्वयोर्नाहुत्योः प्रथमा पूर्वशब्देन विवक्षिता। नतयोः पूर्वापूर्वं होतव्या अन्यदेव किं तावत्प्राप्ते अन्यदेवेति। मंत्रांतरेण देवतां-
तरहोमविधानात्। मंत्रस्य देवताया अभिधानेन कर्म्मभेदकत्वात्। किं द्वयोः प्रथमायाः पूर्वत्वे विवक्षिते नित्यायाम् यस्य सायंस्य वरे
होमस्य बाधः प्रसज्येत। अत्रोच्यते सत्यं मंत्रदेवतयोः कर्म्मभेदकत्वं। पूर्वांगनकामेति देकाम्यकर्म्म प्रकृतं न नित्यं। काम्यानित्यस्य

34

वाचकं। पुरुषार्थसमासन्नः काम्यं नित्यस्य वाधकमिति न्यायात्। तस्माद् अग्न्याधेयाद्यथा सूर्याय स्वाहेति नित्ये आहुती वा विद्याद् उपमं सोमि

त्रावरुण। इत्यादि मंत्र विहिता पत्नी कर्तृका कर्म्मान्तरतया हि काम्या आहुतिः प्रवर्त्तते। यथा गोदोहनेन पशुकामस्य प्रणयेदित्यत्र

काम्यं गोदोहन प्रणयनं नित्यं चमससंवाधित्वेव प्रवर्त्तते। अत्र कथं वाध्यवाधक भावः। उच्यते नित्यं तावद् अफलं अकरणे प्रत्यवायजन

कं काम्यं तु फलवत्। तत्र फलवद् अफलवत् अफ [illegible] लं वाधते। अत्र यदि केचित् प्रत्यवतिष्ठेरन्। आधानानु विधानानि तर्हि सायं प्रा

तर्होमानु विधानं कर्त्तव्यं। आचार्येण केन हेतुना अत्र कृतं कोदायत्वितिष्ठापन प्रकरणे आम्नातं। कथं षड्वर्त्तीनिवंती त्यानन्य

३८ तासु दूषणेषु तं विवाह प्रकरणे यतः तत्र समाधीयते सूत्रकारस्य शैलीयं विवाहात् प्राक् आवसथ्याधानकथनं यथाने ३८

तर्ह्यंकरणीयं। विवाहाग्निर्वा वसथ्याग्निरिति पक्षस्याचार्यस्याभिमतः। तेनात्र होमानुविधानं कृतमिति। विवाहाग्ने नौपासनवैकु

तावगतमिति विवरा वैवाहिके होमो कुर्वीत तस्मात्रैकर्म्म यथा। विधिः। पंचयज्ञविधानं च पङ्क्तिश्चा वाहिके। द्विजः इति मनुवचनात्। कर्म्म स्मार्तं

विवाहाग्नौ कुर्वीत प्रत्यहं गृही। दायकालाहृतेनापि श्रौतं वैतानिकाग्निषु इति याज्ञवल्क्यवचनात्। कृतविवाहस्य सभार्यस्याव

सथ्याधने [illegible]षिकाद्। आश्वलायनगोनिला। दिश्यकानवक्तनं चतस्मादक्क सम्मातत्वाह विवाहसमनंतरमेवहोमविक्षनाद्वाचार्य
स्वाविवाहहोमसाधनाग्निनैवोपासनं संमतइति। अत्रोच्यते। आश्वलायनगृह्यमतं मध्वादिकवचनं तु यथाशृह्यमाहितोपासना। ग्निपरी
ष्वशाखाधर्मप्रतिपादनपरं वाजसनेयिनां पंचदशशाखाश्च यिणांमाध्यंदिनका एवप्रवृत्तीनानांवापानर्कवायस्पित्ध आवसथ्याधानप्र
यागंविवाहप्रयोगात्पृथगनु विदधतोनेकपरः सम्मतइतिगम्यते। यदि विवाग्निनैवोपासनाग्निरितिसम्मतंस्यात्तदावस
ध्याधानंदानकालइत्यादिन पृथक्प्रयोगमनु विद्यारा विवाहहोमेनैव आवसथ्याग्नेः सिद्धे पृथक्प्रयोगंनस्पवेयर्थ्या
रा तस्मादस्थानपागेनदोषः। इदंवेऽपासनप्र निवर्णासर्वदानसकृत्यतः ततोग्न मिते ग्निंपरिवर्यद्दर्भोपघातवं सम्भृ
मपर्य्याप्तावलिंषं हन्त्राइनिवलिहनणवि घिपनवाक्यपवित्रणस्पनित्यवंशापयति। छिन्नंलूनंवपिष्टं वसान्नाम्यं मृन्मयंतथा।
लोकसिद्धंगृह्णीतं वेन्मंत्राजप्याः क्रमशयाः। छिन्नादिलोकसिद्धंवेदाद्वियेत। क्रत्वप्रनिाततन्मंत्रजपं प्राह जनद्वाऽः कृतनाकृतौ। कि
न्वावहनेलूनेपिष्टेऽग्नेवमृन्मये। खातेवलौकिके प्राप्तेऽपोनाक्ष्येववाजिनी। अत्रवनमंत्रांतेस्वाहाकारहोमो किंतु आदवेवन्नी

कानःप्रतिमंत्रं। किंतु आग्नेयपवा यदाहा। स्वाहाकुर्यान्नमंत्रांतेनैवैव जुहुयाद्विधिः स्वाहाकारेणाहुतीर्मोपश्चान्मंत्रंसमापयेत्। सामगा
नामयं। नोंकुर्याद्धोममंत्राणांपृथगाविभुक्तत्वविधि। अन्येषांवा विच्छिन्नानांकालेनाचमनादिना। अविच्छिन्नानां अनंतरितानांकालेन
आचमनादिनावा। अथप्रयोगः। आवसथ्याधानोत्तरकालीनतद्दिवसएवसायंप्रातर्होमनिमित्तंमार्जपूजापूर्वकमाभ्युदयिकं
35 श्राद्धंकृत्वा। संध्यावंदनानंतरंअग्निसमीपंगत्वा पश्चादग्नेःप्राङ्मुखउपविश्यपत्रपयमनकुशान्‌समिधश्चाग्नेःमणिकवारि
दध्यादीनामन्यतमंहोमद्रव्यं अग्नेरुत्तरतःप्रा वःआसाद्य उपयमनकुशानादायनिष्टसमिधिमिद्धेऽभ्याधाय पर्युक्ष्यदा ३५
३५ दशापर्वपूरकेणदध्नितंडुलयवानामेकतमेन द्रव्येणहस्तेनैवस्रुग्गानिगिर्विधिविवक्षोमध्यप्रदेशेदेवतांध्यायञ्जुहु
यात्। अग्नयेस्वाहा। इदमग्नये। तदनन्तरंमनसाप्रजापतयेस्वाहा। इदंप्रजापतयेनमायं। तथैवसूर्यायस्वाहा। इदंसूर्याय। प्र
जापतयेस्वाहा। इदंप्रजापतयेनित्यागांमिति प्रातः। पत्नीवेत्कर्मकामाभवतितदा पुमांसंसोमित्रावरुणौ पुमांसमश्विनावुभौ
जो। पुमानिन्द्रश्चसूर्यश्चपुमांसं मंवर्द्धतां मयिपुनःस्वाहेतिपूर्वामाहुतिंपत्नीजुहोतिउत्तरांयजमानः। इदंमित्रावरुणाभ्यां अश्वि

क

ध्या मिंद्राय सूर्याय च । इति नित्यहोमविधिः ॥ अथ नैमित्तिकमुच्यते । गृह्योक्तभेदेन होमो ऽयानविपर्यासे न्यस्यां वा व्यापन्नौ ग्नि स
न्धो द्दहने । ना ऽग्नेः प्रज्ञापालन । चिह्नतस्य पात्रादि ग्नि स्थितस्य भ्रष्टसंभेदेन धावयव भंगेन दृष्टविमोक्षेण दृष्टस्य नष्टस्य विमोक्षे सक्रे द्दहन
चक्रे देवा यान विपर्यासे ग्नेर्भोक्तृ खादि भावे व ग्नेन्यस्यां वा व्यापन्नौ । अन्य मित्र वा ग्नेषु न सूतके निमित्ते क्रिया श्चो द्दहने ऽश्वादि
तापाः पूर्वं पतिगृहं नयने च तथा गृह्योक्त भेदादिको । निमित्त संज्ञा तेन नैमित्तिकं प्रायश्चित्तरूपं कर्म्मोच्यते कर्मोपपाते प्रायश्चि
त्तं तत्काल मिति वचनात् निमित्त समनन्तरम् च नैमित्तिकं कार्यमिति यथा । तमेवाग्नि मुपसमाधाय ऽग्न्यं संस्कृत्य होतानि
निर्जुहोति नाना मंत्राभ्यां । नमेवय [illegible] । निमित्तं तदा प्रायश्चित्तं निर्किसेना ग्निं यदि क्रियाः निमित्तं तदेवाहि कम
ग्निं पर्व धूर्संस्कारात् ह्रत्वा ऽपसमाधाय स्थापयित्वा ब्रह्मोपवेशनादि पर्युक्षणान्ता कृशकण्डिका विस्मय पक्षएव विधिर्यत्र क विधि
मङ्गल्प नने वा ऽप संस्कारे प्राप्ते पुनर्न्याज्यसंस्कृत्य तिवचनं आघारा होमान् प्राग्वद्दहनं निर्जिह्यात्वा ऽज्य भागो निद्वयप्रो [illegible]र्थन तथा
पर्युक्षणां ना ऽस्कन्न निनितिना नामंत्राभ्यां द्वाभ्यां मंत्राभ्यां जुहोत्याज्ञो लिद्वयं तन आघारादि [illegible] क्रद्दंती । अन्यधान मुपकल्पन

त्रापवेशयेद्राजानं स्त्रियं वा प्रतिष्ठेत्वदं नियच्छांतेनावाहार्षमिति वैनया। अन्यद्वथादिके यानं वाहनं तप्यकल्पसंयोजयेत्तत्र तस्मि
न्यानेनराजानं नृपं स्त्रियं वोद्यादिति तां वध्वं तत्प्रवेशयेत्। आरोहयेत्। कर्यां प्रतिरूवे प्रति निष्ठामि नाषूड्डुत्सादिना प्रति निष्ठामि यच्छ इ
36 त्यनेनेन मंत्रेण आ वा वाहार्षमित्येतयर्चा वा युर्यादक्षिणा प्रायश्चित्तिः कुर्यो घृतिसाध्वं अनड्वाहो दक्षिणा ब्राह्मणे देया दक्षिणो शान्त
पतिक्रयार्थ द्विवावर्त्तनीयेन। अत्रैवृद्धिश्राननि र्भवति। इदं कर्म प्रायश्चित्तिः दुर्निमित्तसूचितदुरितापहानिः। अतः सनिमि
३९ त्तो भवति। तत्र ब्राह्मणभोजनं। तत कर्म्म समा प्तानंतरं ब्राह्मणस्य भोजनं कारयितव्यं॥ इति सूत्रार्थः॥ अथ प्रयोगः॥ अ ३९
द्यादिनिमित्तानामेकतमे निमित्ते संजाते शुभे देशोपवेसंस्कारान्कृत्वा नागतः पुरोहितः सेनाग्निमुपसमाधाय यावदथ वरः
वैवाहिकामग्निं विस्थापयेत् वेनादिपर्युक्षणांतं। इह रतिविधिनमद्यामिह धृतिरिह स्वधृतिः स्वाहेति प्रथमां। इदमग्नये इत्याहुतिद्वय
सृजे यद्गुणमात्रे षट्गुणो मा तत्प्रवृत्ता नाय स्वाहा षमस्मा सुदीव तत्स्वाहा इति द्वितीयां। इदमग्नये। इत्याहुतिद्वयं हुत्वा ततनत्राघारा
दि स्विष्टकृदंतं तंत्र वद्दशाकृतिंकं होमं विधाय परमेवं प्राशयेत् वमथ युर्यानड्वाहो ब्राह्मणे अस्य कर्म्मणः प्रतिष्ठार्थं एतावनड्वाहो दम्यां

ब्रह्मणो मया दत्तो। इति प्रयोगेण दक्षिणां दत्वा अन्यधानमानीय तत्र प्रणीते। हितौ वाज्ञानं वनो वहूं उपवेशयेत्। प्रणिधत्रं प्रतितिष्ठा

मिनावृश्रावार्यमिति मंत्राभ्यां। ततो ब्राह्मणभोजनं। चतुर्थ्यामपि नात्रे स्पूंलतो ग्निमुपसमाधाय दक्षिणतो ब्रह्माणमुपवेश्य।

आनतउदपात्रं प्रतिष्ठाप्य स्थालीपाकं श्रपयित्वाज्यभागौ। विष्ट्वाज्याहुतीर्जुहोति। चतुर्थ्यां तिथौ। विवाहतिथिमारभ्य। अपरा

ह्णे पश्चिमे यामे अभ्यंतरतः गृहस्य मध्ये अग्निं वैवा॥ हिकं उपसमाधाय पंचभूसंस्कारान् कृत्वा स्थाप्य। परिस्तीर्य दक्षिणतो ब्रह्मासनम

स्तीर्य तत्र पूर्ववद्ब्रह्माणमुपवेश्य उत्तरतः उदपा॥ त्रं प्रतिष्ठाप्य। प्रणीतास्थानात् उत्तरतः जलपूर्णं ताम्रादिपात्रं स्थापयि

त्वा। अत्र ब्रह्माणमुपवेश्य निष्पूर्ववनं उदपा॥ त्रप्रतिष्ठापनावसरे स्थापनार्थी। स्थालीपाकं चरुं यथाविधि श्रपयित्वा प

र्युक्षणांते आघारावाज्यभागौ। विष्ट्वा आज्याहुतीः आज्येन पंचाहुतिः वक्ष्यमाणैः पंचभिर्मंत्रैर्जुहोति। अग्ने प्रायश्चित्ते

इत्यादिभिः। स्थालीपाकस्य जुहोति। स्थालीपाकस्य चरोः प्रजापतये स्वाहा इत्येकामाहुतिं जुहोति। हुत्वा हुत्वा तासामाहुतीनामु

दपात्रे संस्रवं स्रवेत्। समवनीया अग्ने प्रायश्चित्ते इत्यादीनां प्राजापत्यांतानां षण्णामाहुतीनां प्रत्येकं हुत्वा हुत्वा संस्रवान् हुतशेषान्

उदपात्रेसमवनीयप्रक्षिप्य । केषांचिन्मतेद्विपृष्ठदर्भाङ्कुरेण पि । ततः पत्नींमूर्द्धन्यपसिञ्चति । ततस्तस्मादुदपात्रादुदकमादायपत्नींवधूं
वनोमूर्द्धनिअपसिञ्चति । यात्तेपतिघ्नीइत्या । दिनामाजीर्यद्वं मयासहा मुक्तिदेविद्रत्यनेन । अथैनां स्थालीपाकंप्राशयति । अथ
सिक्तानन्तरं पत्नींवधूंस्थालीपाकंवस्तुशेषंप्राणैस्तेप्राणान्सन्दधामीत्यादिना वचावचमित्यन्तेनमन्त्रेणवधूःप्राशयति । तस्मादे
वंविद्वान् । श्रियस्पदानेणनापहासमिच्छेदुतद्येवं वित्यनोमवृत्ति । यतोऽनेनवस्तुशेषप्राशनकर्मणा मन्त्रसहमकोप्रापि
दानः तस्मादेवंविद्वस्तुषः श्रोत्रियस्यविदुषः दारेणोपार्यया उपहासंमैथुनंनेच्छेन्नकामयेत । हियस्मादेवंविद
३३ पिश्रोत्रियःपरः शत्रुर्भवति । ताम्प्र डुग्ध्ययथर्तु प्रवेशनां । पर्वंपूर्वक्तिनप्रकारेणतांवधूंगृह्य विवाहयित्वा । विवाहक ३३
र्मणाभार्यात्वंसंपाद्ययथर्तुकृतुकालमृतुकालं प्रवेशनं अभिगमनंकुर्यादितिशेषः । यथाकामीवा । स्त्रियाःकाममननतिक
म्ययथाकामंतदस्याआज्ञेतियत्यथाकामीवाभवेद्यानऋतुकाला । भिगमननियमः । कन्याः काममा । विजानितोःसंभवामेतिव
चनात्कामंद्वेच्छया । आविजनितोः आप्रसवात्संभवामभर्त्रासहसंगताभवामेतिस्त्री । णांइन्द्रात्वरप्रार्थनवचनात्प्रजा ।

पनेरितिकेचित्॥ अत्र यद्यपि यथर्त्तुप्रवेशनमितिसामान्येनोक्तं तथापि स्मृत्यंतरोक्तपर्वादिनिषेधपालनं कार्यं॥ यथाह मनुः

अमावास्याष्टमी चैव पौर्णमासी चतुर्दशी॥ ब्रह्मचारी भवेन्नित्यमप्यृतौ स्नातको द्विजः। याज्ञवल्क्योपि। षोडशर्त्तुनिशाः स्त्रीणां त

स्मिन्युग्मासु संविशेत्॥ ब्रह्मचार्येव पर्वाण्याद्याश्चतस्रश्च वर्जयेत्॥ इत्यादिनिषेधः याथाकाम्यपक्षेपि समानः। यतः प्राप्तेभिगम

ने निषेधः प्रवर्त्तते। गर्भिण्यामभिगमननिषेधः ऋतुकाममभाविजानितां संभवामेति वचनाद्बाध्यते। अनृतावभिगमनोक्तदूर

स्नातां त्वयो भार्यां सन्निकर्षे नोपगच्छति। घोरायां भ्रूणहत्यायां युज्यते नात्र संशयः। तथा ऋतुस्नातां त्वयो भार्यां शक्तः सन्नोपग

च्छति। घोरायां भ्रूणहत्यायां युज्यते नात्र संशयः। लोकानंत्यं दिवः प्राप्तिः पुत्रपौत्रप्रपौत्रकैः। यस्मात्तस्मात्स्त्रियः सेव्याः कर्त्तव्याश्र

अश्मुनक्षिताः। इत्यादिभिः स्मृतिभिः स्त्रीनन्दायां विहितत्वात्तासां कामातिक्रमणे अभिवानशंकासंभवान्नदृष्टार्थं याथाकाम्यं तस्मा

द्याथाकाम्ये न नियमः। याथाकामावे निर्विकल्पेन विधानात्॥ अनभिगमने प्रत्यवायस्मरणाभावाच्च अतः लोकानंत्यादिवत्

प्राप्तिः अथास्यै दक्षिणांसं समभिहृदयमालभते। अथाभिगमनानन्तरं अस्यै अस्या भार्यायाः दक्षिणांसं दक्षिणहस्तं अधिउ

पञ्चि

पतिदक्षिणं हस्तं नीत्वा हृदयमालभते ॥ हृदयं वृन्दः आलभनो स्पृशति ॥ पत्नी ऋत्वसी मद्गृत्यादिना ॥ शृणुयाम शरदः शतमित्यनेन मंत्रेण ॥
एवमनतरुद्धं । एवमनेनैव प्रकारेण अनंतरं नारीनाचनोप्रवेशनं । यथाकामं वा । इति सूत्रार्थव्याख्या ॥ ॥ अथ चतुर्थीप्रयोगः । न
३४ त्रविवाहात् चतुर्थ्यामपररात्रे गृह्यान्यंतनः पंचभूसंस्कारान् कृत्वा विवाहाग्नेः स्थापनं ब्रह्मणः उपवेशनं प्रणीतास्थाने ऽत्र ततः उद
पात्रस्थापनं प्रणीताप्रणयनादि आज्यभागांतं आवसथ्याधानवत् कुर्यात् । आज्यभागानंतरं अग्ने प्रायश्चित्त इत्यादि पि
पंच पि मंत्रैः पंचाज्याहुतीर्जुहोति ॥ अग्ने प्रायश्चित्ते त्वं देवानां प्रायश्चित्तिरसि ब्राह्मणस्त्वा नाथकाम उपधावामि यास्यै पतिघ्नी २५
२५ तनूस्तामस्यै नाशय स्वाहा । इदमग्नये वायो प्रायश्चित्ते त्वं देवानां प्रायश्चित्तिरसि ब्राह्मणस्त्वा नाथकाम उपधावामि या
स्यै प्रजाघ्नी तनूस्तामस्यै नाशय स्वाहा । इदं वायवे । सूर्य प्रायश्चित्ते त्वं देवानां प्रायश्चित्तिरसि ब्राह्मणस्त्वा नाथकाम उपधावामि
यास्यै पशुघ्नी तनूस्तामस्यै नाशय स्वाहा । इदं सूर्याय । चंद्र प्रायश्चित्ते त्वं देवानां प्रायश्चित्तिरसि ब्राह्मणस्त्वा नाथकाम उपधावा
मि यास्यै गृहघ्नी तनूस्तामस्यै नाशय स्वाहा । इदं चंद्रमसे । गंधर्व प्रायश्चित्ते त्वं देवानां प्रायश्चित्तिरसि ब्राह्मणस्त्वा नाथकाम उपधावा

मियास्पयथाग्नौ तन्नूत्रामस्यैनाशयस्वाहा। इदंगांधर्वाया। ततःस्थालीपाकेनप्रजापतयेस्वाहा। इदंप्रजापतये। इतिप्राजापत्यंहुत्वा।
अग्नेप्रायश्चित्तइत्यादिप्राजापत्यपर्यन्तानांषडाहुतीनांसंस्रवंउदपात्रेप्रक्षिपेत्। कयांनिश्चनेस्विष्टकृतोपिसंस्रवंप्रक्षिपेत्। अन्यासा
माहुतीनांपात्रांतरेसंस्रवंप्रक्षिपेत्। ततोऽग्नयेस्विष्टकृतेस्वाहा। इदमग्नयेस्विष्टकृते। इतिस्थालीपाकेनस्विष्टकृतंहुत्वा। आज्येन
महाव्याहृत्यादिप्राजापत्यांतानांनवाहुतीनांहु त्वा ततःपात्रांतरस्थंसंस्रवंप्राश्यपूर्णपात्रवनयात्नन्यत्नेब्रह्मणेद
त्वाउदपात्रादुदकमादायवध्वंमूर्धन्यभिषिं चनियानेपतिघ्नीप्रजाघ्नीपशुघ्नीगृहघ्नीयशोघ्नीनिंदितांतनूंजार
घ्नींततएनांकरोमिसाजीर्यत्वंमयासहेमावि निष्ठत्यनेनमंत्रेण। अथवरःवध्वंस्थालीपाकंहुतशेषंसक्तंप्राशयति
प्राणैस्तेप्राणान्संदधाम्यस्थिभिरस्थीनिमांसैर्मांसानित्वचात्वचमित्यनेनमंत्रेण। मावमन्नेतिमंत्रेपठितेप्राश्नाति॥ ॥
अथअरुन्धतीकालेनक्षत्रदर्शनेसंजातेध्रुवणाद्यगत्योत्पानानिनिमित्तंमातृपूजापूर्वकंस्वयमाभ्युदयिकंकृत्वानान्दीमुखंविनिगमनंकुर्यात्। वि
निगमनानंतरंवध्वादक्षिणांसंअस्यापनिदक्षिणहस्तेनीवाहृदयंस्पृशति। यत्तेसुसीमेहृदयंदिविचंद्रमसिश्रितं। वेदाहंत

मांन द्विषात्पश्येम शरदः शतं जीवेम शरदः शतं शृणुयाम शरदः शत मित्यं तेन मंत्रेण। एवं श्राद्धवर्ज्ज्यं प्रत्यूहकालम् निगमनं कु
र्यात्। याथाकामी वा भवेत्। अन्तकाले निगमनं कुर्यात्। ब्रह्मचर्यान्न स्खलति। ब्रह्मचर्यं व पर्वाण्येपायाश्च न प्रश्नवर्ज्ज्य यथाइतिया
ज्ञवल्क्यस्मरणात्। अन निगमने ऋतुस्नातां तु यो भार्यां सन्निधौ नोपगच्छति। घोरायां ब्रह्महत्यायां युज्यते नात्र संशयः। अन्तु
स्नातां तु यो भार्यां शक्तः सन्नोपगच्छति। घोरायां भ्रूणहत्यायां युज्यते नात्र संशयः। इत्यादि प्रत्यवायस्मरणात्। अतुका
ले निगमने नियमः। याथाकाम्येन न नियमः। याथाकामी वेति विकल्पेन विधानात्। अतः लौनंत्यांदिवः प्रा मिः पुत्रपा ३६
३९ त्रप्रयोजकः। यस्मात्तस्मात्स्त्रियस्सेव्याः कर्त्तव्याश्च रक्षिताः। इत्यादिनिःस्मृतिनिःश्रीकत्वायाविहितत्वात्। नामंकाम
तिक्रमणे व्यभिचारशंकासंभवात् तद्रक्षार्थं याथाकाम्यमिति त्रिवर्गी कर्मपद्धतिः। विष्णुपुराणे। ऋतावभिगमः शस्तः स्वपत्न्या
मवनीपते। पुंनाम्नृक्षे शुभे काले ज्येष्ठायुग्मासु रात्रिषु। नाश्नातां तां स्त्रियं गच्छेन्नाहृष्टां न च रुग्णलां। नाप्रशस्तां न कुपितां नानिष्टां न
च गुर्विणीं। नादक्षिणां नान्यकामां नाकामां नान्ययोषितां। क्षुत्क्षामामतिभुक्तां वा स्वयं चैभिर्गुणैर्युतः। स्नातः स्रग्गन्धहृष्टः प्रीतो ना

आतः क्षुधितोपिवा सकामः सा तु नागच्छ व्यवायं पुत्रपौत्रऽत्र। चतुर्दश्यष्टमी चैव अमावास्याथ पूर्णिमा। पर्वाण्येतानि राजेंद्र रवि
संक्रांतिरेव च। तैलस्त्री मांससंभोगी पर्वस्वेतेषु वै पुमान्॥ विण्मूत्रभोजनं नाम प्रयाति नरकं मृतः॥ ॥ पक्षादिषु स्थालीपाकं श्र
पयित्वा दर्शपूर्णमासदेवताभ्यो हुत्वा जुहोति ब्रह्मणे प्रजापतये विश्वेभ्यो देवेभ्यो द्यावापृथिवीभ्यामिति। पक्षाणां आद्यः पक्षादयः
तासु पक्षादिषु प्रतिपत्सु। अत्र यद्यपि पक्षादिषु सूक्तं तथापि संधिमनिरूहितो यजेतेति वचनात्। पर्वणो यश्चतुर्थोंशः आद्याः
प्रतिपदश्चत्रयः स यागकालः स विज्ञेयः प्रातर्युक्तोम नौ घटिका। इति पर्वचतुर्थांशोपि यागकालत्वेन विमलः। तथा पूर्वाह्ण
वा यन्मध्याह्ने यदि पर्व समाप्यते तदैव यागका। लः स्यात् अन्यथा परेद्युः। संधिर्यदापराह्णे स्यात् यागं प्रातः परेऽहनि कुर्वीत।
प्रतिपद्भागचतुर्थपि न दुष्यतीत्यादि निबंधनैः यागकालं निर्णीय पर्वदिवसे कृतौपवसथिकाशनः सपत्नीकः शालायां जघनेन।
स्त्रियं वा जायया मिश्रश्च इति हासमिश्रा वा पृथक् शाययित्वा प्रातः कृतस्नानसंध्यावंदनं प्रातर्होमः इध्मानाग्नेः पश्चात् प्राङ्मुख उपविश्य
पूर्वाह्ण विधिना चतुरंगम् अपयित्वाज्यभागान्ते दर्शे दर्शदेवताभ्यः पौर्णमासे पौर्णमासदेवताभ्यः प्रयोगवत्त्वाणाभ्यः चतुर्कृत्वा ब्रह्म

प्रजापतिं विश्वेदेवद्यावापृथिवीभ्यश्चत्त्रंजुहोति। विश्वेभ्योदेवेभ्योवलिहरणंभूतगृह्येभ्यआकाशायच। वलिहरणं वलिदानं वैश्वदेवस्य।
अग्नौजुहोत्यग्नयेस्वाहा। प्राजापतयेस्वाहा। विश्वेभ्योदेवेभ्यःस्वाहा। अग्नयेस्विष्टकृतेस्वाहेति। वैश्वदेवस्यविश्वेदेवादेवपितृमनुष्यादेवास्य
स्पतिवैश्वदेवःपाकःपंचमहायज्ञार्थंसाधितपाकइत्यर्थः। मन्त्र। वैश्वदेवस्याग्नौजुहोतीतिविश्वेदेवसंवद्धस्यचरोरनुदितोपात्तस्य
40 वाग्न्यग्नौजुहोतीति। कथंनोच्यतेयथावृषोत्सर्गे पाकस्यजुहोतीतिपृथसंवद्धःपृथगेवपिष्टकाद्यःपूर्वोसिद्धश्चरुर्द्धत्वेति कि
मितिपंचमहायज्ञार्थः। उच्यतेस्थालीपाकश्चरुश्च पयित्वेत्यत्रस्थालीपाकस्यकववनीतवाद्विनीयवैश्वदेवस्य वरो र
४० मावावगम्यतेपाक्लवत्र्वैश्वदेवस्यसिद्धापात्र स्यपृथगुपादानंतु पंचमहायज्ञार्थवैश्वदेवपाकस्यसद्धोवाविवक्षितिपं
चमहायज्ञार्थस्यवैश्वदेवचरुःक्रतइतिवेत्रावैश्वदेवान्नात्पर्युक्ष्येतिसूत्रवाक्यअग्नौजुहोतीतिअग्निग्रहणंवलिकर्मतामाभूदिति। अग्नयेस्व ४०
स्वाहेत्यादिप्रयोगदर्शनार्थंसर्वत्र। तस्यैकदेशस्याहुत्यासमाप्तिप्राप्तितस्यअग्नयेप्रजापतयेविश्वेभ्योदेवेभ्योजुहोतिस्थाली
पाकाद्वैश्वदेवाद्वअग्नयेस्विष्टकृतेजुहोति। ततःशेषसमाप्तिविषयावाद्यतःस्त्रीवलिहरणप्रयोगवत्प्रमाणोनैषाक्रियाः

त्पादिनिर्म्मन्त्रैः। वास्तुनः शालायाः प्रांगणे च बलिं श्रियादिभ्यो बलिः। श्रीबलिस्तंभे बालहस्तिदानि रोषमद्भिः प्रस्राव्या स्थाली स्थि-
तमवशिष्टं चरुं अद्भिर्जलेन प्रक्षाल्य मङ्क्षयित्वा॥ अत्रापः प्रणीताः ताः सो सर्वकर्मार्थं विनेत्र॥ इति तवीत् ततो ब्राह्मणेन जनं व्याख्या-
तं सूत्रार्थः॥ ॥अथ प्रयोगः॥ अथ पक्षादिकर्म्मण्यतो तत्र प्रथमप्रयोगमाह पूजापूर्वकमाभ्युदयिकं श्राद्धं कृत्वा अमावास्यां मांसस्य
शालाल्वणेहविष्यं व्रताशनं वृषमयनात्रा विधि समीपभूमौ दंपती पृथक् कुशशय्यां यातां प्रातः स्नातास व्यावंदनान्तं तं प्रात-
र्होमं च निर्वर्त्य अद्दिने सूर्ये पौर्णमासं स्थालीपा कमाननेत्रा तत्रात्मनेत्रैः प्रणेः प्रणीतानां वासनं चतुष्टयं कुशैर्द्वापसादि
कर्म्माणाहं यच्चैतत्र मे वंब्रह्माणवन्नवामी तित नोक्ते आसनेउपवेश्य अत्रासादने वेष्वदेवान्न सादनं विरोधः प्रोक्षणं चरु-
उपघातं तं यथोक्तं कर्म्म निर्वर्त्य स्थालीपाकमभिघार्य स्रुवेण चरुमादाय अग्नये स्वाहा इदमग्नये। अग्नीषोमाभ्यां स्वाहा इद-
मग्नीषोमाभ्यां। उपांशु पुनः अग्नीषोमाभ्यां स्वाहा इदमग्नीषोमाभ्यां। ब्रह्मणे स्वाहा इदं ब्रह्मणे। प्रजापतये स्वाहा। इ-
दं प्रजापतये। विश्वेभ्यो देवेभ्यः स्वाहा। इदं विश्वेभ्यो देवेभ्यः। द्यावापृथिवीभ्यां स्वाहा इदं द्यावापृथिवीभ्यां। कृतशंस्वि-

वलण्यमेतन्नतः प्राक्संस्थं विश्वेभ्यो देवेभ्यो नमः इदं विश्वेभ्यो देवेभ्यः भूतगृह्येभ्यो नमः इदं भूतगृह्येभ्यः आकाशाय नमः इदमाकाशाय बलिं स्रुवेण
बलित्रयं दत्वा अभिघारितं वैश्वदेवान्नं स्रुवेणादाय अग्नये स्वाहा इदमग्नये प्रजापतये स्वाहा इदं प्रजापतये विश्वेभ्यो देवेभ्यः स्वाहा इदं विश्वे
भ्यो देवेभ्यः । हुत्वा आहुतित्रयमग्नौ कृत्वा स्थालीपाकान्नात् वैश्वदेवान्नाद्वा अग्नये स्विष्टकृते स्वाहा इदमग्नये स्विष्टकृते इति हुत्वा भूमि
त्यादि प्राजापत्यान्तान् नवाहुतीर्जुहुयात् संस्रव प्राशनं । मार्जनं पवित्रप्रतिपत्तिं प्रणीताविमोकं ब्रह्मणे दक्षिणादानान्तं कृ
से४ ५१ त्वावशेषमादाय शालाया बहिरुपलिप्तायां भूमौ प्राङ्मुख उपविश्य स्रुवेण नमः श्रियै इदं श्रियै नमः पुंसे वयसे वयसे इदं ५१
पुंसे वयसे वयसे नमः शुक्लाय कृष्णदन्ताय पापीनीपतये इदं शुक्लाय कृष्णदन्ताय पापीनीपतये । नमो ये मे प्रजामुपलोभ
यन्ति ग्रामे वसन्त उत वारण्ये तेभ्यः । इदं ये म इत्यादि । नमोऽस्तु बलिमेभ्यो हरामि स्वस्ति मेऽस्तु प्रजां मे ददतु । इदं श्रियै पुंसे वयसे वयसे शुक्ला
य कृष्णदन्ताय पापीनीपतये । नमो ये मे प्रजामुपलोभयन्ति ग्रामे वसन्त उत वारण्ये तेभ्यः । इदं ये म इत्यादि । नमोऽस्तु बलिमेभ्यो हरामि
स्वस्ति मेऽस्तु प्रजां मे ददतु । इदं श्रियै पुंसे वयसे वयसे शुक्लाय कृष्णदन्ताय पापीनीपतये ये मे प्रजामुपलोभयन्ति ग्रामे वसन्त उ

तन्तवानण्येतेभ्यः। इदमेभ्यो वान्यासां। शेषमद्भिः प्रप्लाव्याव स्याग्नि समीपमागत्यएकस्मैब्राह्मणायमोजनंददामीतिसंकल्प्यपोदि
तिपक्त्वा। दिकर्म्मविधिः। दर्शंपुनर्नियान्वि शेषः। स्थालीपाकेमाग्नेयेविष्णवेइंद्राग्निभ्यां। मितिदर्शदेवताभ्योहोमः। पौर्णमासेग्ननुदि
तेवानंतरः शेषंसमानं। सायमादिप्रातरंतमेकंकर्म्मप्रक्रान्तो। पौर्णमास्यादिदर्शान्तमेकमेवंविद्धुर्बुधाः। इतिवचनात्। कल्पतरौयद्य
पनंतदादर्शंप्रतिष्ठैवपौर्णमास्यांपक्त्वा। दिकर्म्म तंतः। यत्तुछंदोगपरिशिष्टवचनं। ऊर्द्ध्वंपूर्णाङ्कृतेदृशः पौर्णमासमपि वायि
मः। यश्चायातिसद्योनव्यसप्रवादिनितिकृतं। तत्पुनराधानविषयंतच्छा। विविषयंवा। इतिपक्त्वादिप्रयोगाः॥ ॥ साय
हिरामंनदधीतसायार्योयदिवेत्रगर्भं नक्षत्रपेत्। सिद्धार्थाश्वेतपुष्पाउपोष्यपुष्येणमूलमुत्थाप्यतदर्थेहनिस्नातायांनि
शायाम्भूदपेसंपिष्ठादक्षिणस्यांनासिकायामासिंचानि गर्भधारणोपायमाह। सिद्धार्थाः कंटकारिकायाः कथंमूलायाः श्वेतपुष्पा
ः। श्वेतानिपुष्पाणियस्याः साश्वेतपुष्पीतस्याः। उपोष्यउपवासंकृत्वापुष्येणवंद्रमसायुक्तेनपुष्यनक्षत्रेणमूलेशिफांउत्थाप्यत
दुत्पनत्रोदर्शनाथस्तदर्थेहनिस्नातायांनार्यायांरात्रौउदपेषंयथाजवातितथापिष्ठानमूलंउदकेनपिष्ठाद्दक्षिणनासापघेत्स्पर्थः।

दक्षिणस्यां नासिकायां दक्षिणेनासासंबद्धे वसिंचति न्नसयति मिन्नाइयमोजवी त्रायमाणा सहमाना सरस्वती। अस्या अहं बृहत्याः
पुत्रः पितुरिव नामजाग्रभमित्येतेन मंत्रेण॥ ॥ अथ पुंसवनं अथ अवसनप्राप्तं पुंसवनं। [illegible]गर्भसंस्कारकं कर्म व्याख्यास्यते।
पुनास्यन्दतइति। पुनाम्न अग्रेस्पंदते वलिप्सति यावत्पुनाम निपातनयोर्लेडिति पुनायोगे न विष्यदर्थे वर्त्तमानप्रयोगः इति देतोः। मा
५२ सद्वितीये तृतीये वायद्दहः सपुंसनक्षत्रेणचंद्रमा। युज्यते तागर्भाक्रमणकालात् द्वितीयतृतीये वा मासे यस्मिन्नहनि पुंसा
पुत्रषना प्रा पुष्याद्दिननक्षत्रेण चन्द्रुना शशीयुक्तोभ वत्यात दहस्तुपवास्यां स्नात्वाहतेवाससी परिधाप्यातस्मिन्नहनि उपव ४२
४२ स्या योऽनंकामपित्वा मार्याअप्सात्यस्नापयित्वा अहतेनवेसदृशेसक्रुमस्ता लितेवाससी अंतनीया तनीये हृदयनिधाय
पतिश्चतंकामपिबा। न्यग्रोधावनोदाछुंगांश्च निशायाम्मुद पेषं पिष्ट्वा पूर्ववदासेचनं न्यग्रोधस्य वटस्य अवनोदात् अवाचीनैश्च
धः नोहंतिजायंतेइत्यवरोहाश्चात् शुंगो नयपल्लवानुमुकुलाकानातावकानीविरोह सम्बद्ध्यार्थी नतश्चोनयं। तत्रो पूर्ववत्
गर्भाधमनार्थी कवत्र पिष्ट्वा पूर्ववदेव आसेचनं नस्तुः। दक्षिणासांके मंत्रविशेषमाह। हिरण्यगर्भोऽप्सुः संभृत इत्येताभ्यां
१गी

स्ये २ नम २

स्यां। कुशकंटकं सोमांशं वैके। एके आचार्याः न्यग्रोधावरोहः शृंगेषु पिष्यमाणेषु कुशस्य कंटकं। मूलं सोमांशुं सोमलतापिंडं

प्रक्षिपंति। तत्पश्चाद्दूर्वापर्णं। कूर्मपित्तं वा पक्षे। वा उत्संगे कृत्वा स यदि कामयेत वीर्यवान्स्यादिति विकल्पेन अभिमंत्रय त्या २

त सुपर्णोसीति प्रा विष्णुक्रमेभ्यः अन्नकामा माहामसः प्रज्ञो यदिकामयेत अयं गर्भो वीर्यवान्शक्तिमान्स्यादिति छेशं तदा अस्या

नार्यायाः उपस्थे कूर्मपित्तं जलपूर्णं शरावं नि अय विकृत्या विकृतिश्छंदसा या सुपर्णोसीत्यनया कृत्वा अधःपतत्रं तया

धनं गर्भमभिमंत्रयते हस्तेन गर्भाशयं स्पृष्ट्वा मं त्रं उपतीत्यर्थः। विष्णुक्रमेभ्यो विष्णुक्रममंत्रेभ्यः प्राक् एवं यावद्दिक्कृतेप

निमा णोमिति मूत्रात्पर्यः। अथ प्रयोगः। तत्र ग र्भाधानप्रभृति द्वितीयतृतीये मासे तीये वा माघे यस्मिन्दिने पुष्यनक्षत्रयुक्तश्चं

द्रः स्यात्तस्मिन्नहनि गर्भिणीमुपवासं कारयित्वा मातृपूजाभ्युदयिकं विधाय यजमानो अपि चाहतवाससी परिधाप्य नावोन्य

ग्रोधावरोहौ शृंगी श्वेतदर्केन पिष्टा परोक्षं कुशकंटकं सोमांशुं वनासिकायां दक्षिणपुटे आसिंचेति मंत्रो। हिरण्यगर्भ इत्यूचः

संभृत इति अद्भ्यः स यदीछेद्वीर्यवान्स्यादयं गर्भस्ते तदा तस्याः त्रिपाद उदरे शरावं उपस्थे कृत्वा सुपर्णोसीत्यनया विष्णोः क्रमोसी

त्वेतस्मात्प्राक्पठितया विकृत्या कृत्वा तं गर्भमभिमंत्रयते पिता ॥ ॥ अथ सीमन्तोन्नयनं पुंसवनवत् । अथ पुंसवनानंतरं क्र
मप्राप्तं सीमंतोन्नयनं गर्भसंस्कारकं कर्म व्याख्यास्यते । तत्र पुंसवनवत् पुंनक्षत्रे भवति । प्रथमगर्भमासे षष्ठे ऽष्टमे वा । आ द्यग
र्भे गर्भाधानप्रभृति षष्ठे ऽष्टमे वा मासे नियमेन कुर्यात् । गर्भान्तरेषु नियम इति कर्कोपाध्यायाः । अन्ये तु प्रथमगर्भ एवेति तथा च
आश्वलायनगृह्यपरिशिष्टं । प्रथमे गर्भे सीमंतोन्नयनं संस्कारो गर्भमात्रसंस्कारः । सकृत्संस्कृते संस्काराः सीमंतेन द्विजस्त्रि ४२
यः । यं यं गर्भं प्रसूयंते स सर्वः संस्कृतो भवेत् । सीमांमदवलम्ब्य संस्कृता नारी सर्वगर्भेषु संस्कृता । उपवासाप्लावना कृत्वा
मायुगपरिक्षपणानि वर्तिनाष्टद्वयं । तिलमुद्गमिआज्यस्थालीपाकं श्रपयित्वा प्रजापते हुत्वा । तत्र विशेषमाह । तिलैर्मुद्गै
र्मिश्रः तिलतिलमुद्गमिश्रः तं । स्थालीपाकं ओदनचरुं श्रपयित्वा । आज्यभागान्ते प्रजापतये स्वाहेत्येकामाहुतिं हुत्वा स्विष्टकृदादि प्राशनां
तं विदध्यात् । पश्चादग्नेर्भद्रपीठ उपविष्टायां । अग्नेः पश्चिमतः भद्रपीठे दक्षिणतः सुखासने आसीनायां गर्भिण्यां सत्यां । युग्मेन सकेटालुयस्य
नौडुम्बरेण त्रिश्वेतया दर्भपिंजुलैः शलल्या चारतस्र शंकुना पूर्णचात्रेण च सीमंतमूर्ध्वं विनयति भूर्भुवः स्वः । इति प्रतिमन्त्रं द्वाभ्यां त्रिर्
४२

ततो जन्मा मस्तकसूत्रेणाङ्गुष्ठं बद्ध्वा कुवनयुग्मेन ह्यादियुग्म फूलवत । सटालुग्रन्थेन अपक्ष्मफल एकस्तवक निबद्धेन त्रिनिर्द्दिष्टपिंजुले
ष्ठिनिर्द्दिष्ट पवित्रैश्च त्रेणपातिपुस्थाने पुष्येता ... णी तयात्रोणपाशलल्पा शल्लुकया स्यापहकंटकेनाबीरतनुशंकुना शरवेषी कर्म ॥
मश्चैत्येन वा शंकुना पृष्ठं वित्रेण वस्त्रूत्रेण पूर्णं पूर्णं वात्रं सूत्रकर्तनसाधनं तेन लोहकीलकेनावकानः सर्वं समुच्चयार्थः । अतश्च अ
ङ्घ्रवनयुग्मादिभिः सर्वैः पुंजीकृतैस्सामंतं त्रि याः ऊर्द्ध्वं विनयानि पृथक्कृत्वा । निललाटाद्ध्वनमानपकेशाद्द्विषाकर्णे नि ।
भूर्भुवः स्वर्विनयामि इत्यनेनावतामंत्रेण सकृदेव । पत्नीं नमाद्धा वाङ्निप्रांतिमहाव्याहृतिभिः । महाव्याहृतिभिर्महाव्याहृ
तिं प्रांति वा विनयति । ततश्च भूर्विनयामि । भुव र्विनयामि स्वर्विनयामि इत्येवं त्रिर्विनयनं भवति । अत्र व्याहृतिमंत्रपदा
नां आख्यातपदं विना वाक्यस्यासंपूर्णत्वात् आख्यातपदाध्याहारः कर्तव्यः । तत्र विधियुक्तस्य मंत्रे ... स्यादित्यपायात्र
विनयतीति विधिपदं विपानिणपमप विनयामीत्यध्याह्रियते । त्रिवृतमावद्धानि । त्रिवृतं वेणी प्रतिश्राव ... नि पुंजीकृतमौ
ङ्घ्रनादि पिंचकैर्वर्णा नियुनक्तीत्यर्थः । अयपमूर्जावनोऽट्टसक ऊर्जी वफलिनी भवेति मंत्रेण । अथाहवीणगाथि नौ नाऊ

संगायेतां। योवाप्यन्यो वीणागाथिन इति। अथौदुम्बरादि पंचकस्य वेणीवंधनानन्तरं ब्रवीति। किं देवी णौ गायेतां राजानं भूपतिं
संगायेतां राजवर्णनसंवद्धं अश्ववादिरूपकीं सम्यग्गायेतां युवां। अथवा योन्यो पि राज्यो ऽतिनिक्तो वीणागाथिनः प्रकृष्टो वीणः भूतस्तं
संगायेतां मित्यनुषंगः इत्याह ब्रवीति नियुक्तामप्येकं गाथा मुपोदाहरंति एके आचार्याः नियुक्तां गाने विहितां गाथां मंत्रं उपो
दाहरन्ति पठन्ति अपि समुच्चयार्थः। तत्पक्षे राज वीणागाथिनयो तन्त्रगानं गाथागानं वा तां गाथामाह। सोम एव नो राजे
४४ त्यादितीरेऽस्या मित्यंतां। पद्धतिकारपक्षे राज वीणागाथिनां प्रकारमस्येव गानं। तत्पक्षे नियुक्तामपीत्यपिशब्दो२ ४४
विवक्षितार्थः स्यात्। असावितियां नदीमुपावासि तां भवति तस्यां नाम गृह्णाति। तलोगा विलीयां नदी उपसमीपे आवासिन
स्थिता भवति तस्यात् घाः असाविति गंगायमुना इत्येवं प्रथमां तं नाम गृह्णाति। ततो ब्राह्मणेभ्यो जनामित्युक्तार्थमिति सूत्रव्या
ख्या। अथ पद्धतिः। तत्र प्रथमगर्भे षष्ठे ऽष्टमे वा मासि पुंनक्षत्रे। मातृपूजा वृद्धिश्राद्धं च कृत्वा बहिःशालायां पंचभूसंस्कारान् कृत्वा
लौकिकाग्निमुप[illegible]समाधाय पत्न्युपवेशनाद्याज्यभागांतं विदध्यात्। तत्र विशेषः। पात्रासादने नैव आज्यासन्नं नवनीतं तंडुलतिलमुद्गा

२श्राद्ध

निष्टडुपीठं । युग्मान्पोडुम्बरफलानि एकमवकानि वद्धानि । त्रयोदर्ज पिंडलास त्रोणि
नां क्रमेण पृथगासादनं । उपकल्पनीया । तौविल्योवायांकुः । पूर्णपात्रंवीणागाथिनौ वेति । आज्यमविश्रृत्य वत्रस्थाल्यां स्रुक्स्रुवाः श्र
शलली । वीमतनशंकुः शरेषीकाः । निष्पाविश्रृत्य दिक्षु कृतेषु मृदुःषु तिलतंडुलप्रक्षेपं कृत्वा पर्यग्निकरणं । कुर्यात् । ततआज्यभागान्ते स्थालीपाकेन प्रजापत
यस्वाहेति हुत्वाइदंप्रजापतयइति त्यागं विधा यस्थालीपाकेनोत्तरा र्द्धात्स्विष्टकृतं हुत्वा महाव्याहृत्यादि प्रा
उपान्त्याहुतीर्हुत्वा संस्रवं प्राश्य पू र्णपात्रवरयोर्न्यतरं ब्रह्मणे दत्वा पश्चादग्नेर्भद्रपीठं स्थापयित्वा गा
र्हिण्यां यो षितं स्नातायां परिहितां हतवाससं युगायांमद्रपीठउपविष्टायांयुग्मेन सटालु यस्मेनोडुम्बरेणत्रिस्त्रिय
दर्भपिंजूलैः श्लाघ्नां शलल्यावीरततनशंकुना । पूर्णपात्रेणवत्पत्तेः सर्वैः पुंजीकृतैः स्त्रियाः सीमंतं भूर्भुवःस्वर्विनयामीति
ईक्षिपति । मंत्रेणसकृत् । यद्वा भूर्विनयामि । भुवर्विनयामि । स्वर्विनयामि इति त्रिर्विनयति । ततो विनायनसाधनमौदुम्ब
नादिपंचकं स्त्रियावेण्यांवध्नाति । अयमूर्जावतोवृक्षऊर्जीवफलिनी भवेति मंत्रेण । अथवीणागाथिनौराजानं संगायेता

मितिप्रैषं ददाति। अथवा अमुकं वीनतनं संगायेतामिति। ततस्त्रौ यद्धानायप्रेषितौ तं गायतम्। अथवा वीणागाथिनौ सोमं राजानं संगा
येतामिति प्रेषितौ सोम एव नो राजेमा मानुषीः प्रजाः। अविमुक्तचक्र आसीत्तीरे तुभ्यं इत्येतां गाथां वीणागाथिनौ गायतः। इति वि
कल्पपक्षः। समुच्चयपक्षेण राजानं अन्यं वीनतनं वा। सोमं वा राजानं वा संगायेतामिति प्रेषितौ उभयं गायतः। असौ स्थाने समीपा वा स्थिता
याः गंगाप्रमुखायाः नद्याः प्रथमां तां गंगेत्यादिना। मएष्ठज्ञातिगर्भिण्येवा। ततो ब्राह्मणेभ्यो ऽजनं ददाति। अत्र प्रथमगर्भ इति
४५ ववनारम्भी संस्कारकर्म्म चाव्र यतः संस्कारसंस्कृत संस्काराः सीमंतेन द्विजस्त्रियः। यं यं गर्भं समूयेते स समर्घः संस्कृतो भवेत्। न प्र ४५
तिगर्भं सीमंतोन्नयनं। पुंसवनं तु दृष्टार्थत्वात् थ्यकाल मतेप्रतिगर्भं भवति। सोष्यंतीमद्भिरभ्युक्षत्येजत्तु दशमास्य इति
प्राधस्येनेदृति। सोष्यंती प्रसवकालवती स्त्रियं पत्नीमद्भिर्जलेनाभ्युक्षति प्रोक्षति। एजतु दशमास्य इत्यनया प्रायस्ये लद् इति।
प्राक्रुपाणिनया कृत्वा यवसानया विराट्जगत्या। अथावरावपतनं। अथाभ्युक्षणानंतरं अवरावपतनं अवरं गर्भवेष्टनं जरायु
ष्टितं। गर्भवेष्टनं अवरावीनं अवपततयोनेन ऊर्ध्वेनेत्यवरावपतनं। मेकेश तं स्त्री समीपे उपविश्य पत्नी जपति। यथा। एवैतु

प्राग्निरोवालंइत्यादि॥ अवजानास्तुपघनामित्यंतं॥ जातस्यकुमारस्याछिन्नायांनाड्यांमेधाजननायुष्येकरोति॥ तत्रजातस्यउत्पन्न
स्यकुमारस्यपुत्रस्यअछिन्नायांनाड्यांअखंडितकालेसतिमेधाजननायुष्येमेधाजननंचआयुष्यंचमेधाजननायुष्येकरोति
पिताम्मेधाजननंतावदाह॥ अनामिकयासुवर्णांतर्हितयामधुघृतंप्राशयतिघृतंवाभूस्त्वयिदधामिभुवस्त्वयिदधामिस्वस्त्वयि
दधामिभूर्भुवःस्वःसर्वंत्वयिदधामी॥ ति॥ अना मिकयाअंगुल्यासुवर्णेनाछादितयामधुचघृतंचमधुघृतेद्वंद्वसमासस्ताभूर्ष्या
दकीकृतघृतंवाकेवलंकुमारस्यप्राशयति कुमारस्यजिह्वायांनिमार्ष्टिभूस्त्वयीत्यादिसर्वंत्वयिदधामीत्यंतेनमं
त्रवाक्यसमुदायेन॥ नचपर्यैकत्वादेकंवाक्यमि तिङमितिसूत्रात्सुप्तिङन्तमसुप्तिडंतचयोवाक्यंक्रियावाकारका
न्विताइत्यमरसिंहात्अनेकार्थमेकंवाक्यंएकस्यवाक्यस्यवानेषांवाक्यंनित्याकांक्षंमिथःसंबद्धमितिकात्यायनवचनेनैक
मंत्रत्वमितिप्रतिपादनार्थंकथमंत्रवाक्यसमुदायस्यैकमंत्रत्वं॥ अत्रकथ्यते॥ सत्यंयद्यपिइडनिकारादिकंमंत्रावसानज्ञापकंकोपि
तस्याशि॥ अत्रपुनर्नितिकामोमंत्रावसानज्ञापकोजागर्तितिननायंदोषः॥ यथास्मवेभूर्भुवइत्येतावतैवगार्हपत्यमादधाति

तः सर्व्वैः पूर्वं निराह्नीयमादधानि भूर्भुवः स्वरिति विकल्पेनोक्तो वा समुदायस्येति कारेण मंत्रावसानं ज्ञापयतो कालीयसूत्रेपि दारुम्नि
कलत्र माद्यवानि भूर्भुवरिति। आस्वनीयमादधाति भूर्भुवः स्वरिति। अत्र यद्यपि एकैकस्याव्याहृतेर्मन्त्रत्वं युक्तं समस्तानां व्या
हृतीनां तथापीतिकारेण द्वयोर्नापिव्याहृत्योर्मन्त्रत्वं व्यवस्थाप्यते। एवमन्यत्रापि बहूनां मंत्रवाक्यानां इतिकारादिविनिपाते
न मंत्रैक्यं। तत्र तत्रायमेवन्यायोनुसर्त्तव्यः। अ यास्यायुष्यं करोति नाभ्यां दक्षिणे वा कर्णे जपति। अथ यमवाजनामानं तं
अस्य कुमारस्य आयुष्यं आयुषे हितं जीवनवर्द्ध नं कर्म्मकरवानि। तद्यथा नाभिदेशे दक्षिणे वा श्रवणे नाभ्यां दक्षिणे कर्णे ५८
45 वा इति नियमार्थिकारणेन सप्तमी गंगायां घोष इतिवत्। तेन नाभिसमीपे कर्णसमीपे वा जपः। अग्निरायुष्मानित्यादि
का मंत्रान् त्रिरूपतिर्वा वारानुपांशु पठति। अग्निमामक्षमदेवत्रापिपितृयज्ञसमुद्रइत्युक्तं आयुषमितिवा ततः आयु
ष्यं जमदग्नेरित्यादिना त्र्यायुषं त्र्यायुषमित्यंतेन मंत्रेण तथैव विज्ञेपालिः इदं चायुष्यकरणं कालातिक्रमेपि क्रियते मेधाजन
46 नं त्वमुख्यकालातिक्रमान्निवर्त्तते। घृतं वेवायमप्रतिलहयं तिष्ठनं वेवात्रुवा पयंतीति जातमात्रस्य कुमारस्य स्कन्ध्यामेधाज

नतोपदेशात्॥३॥ मय दि कामयेत सर्वमायुरियादिति वात्सप्रेणैनमभिमृशेत्॥३॥ सः पिता यदीच्छेत् अयं कुमारः सर्वं संपूर्णमायुः जीवितं इयात्
